# ChAgaleyopaniShat

# છાગલેયોપનિષત્

## Document Information

Text title : ChagaleyopaniShad

File name : ChAgaleyopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi Radim Navyan radimnavyan at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : November 3, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# છાગલેયોપનિષત્

ॐ ઋષયો વૈ સરસ્વત્યાં સત્રમાસત । તેઽથ કવષમૈલૂષં દાસ્યાઃ
પુત્ર ઇતિ દીક્ષાયા આચ્છિદન્ । તે હોચુઃ । અપ વા એતદૃગ્યજુષાદપ
સામ્ન ઇતિ । સ હોવાચ । ભગવન્તો યદિદં સત્રમાધ્વૈ
યદૃચોઽધીધ્વૈ યદ્યજૂંષિ યત્સામાનિ કસ્યાયં મહિમેતિ । તે
હોચુર્બ્રાહ્મણા વાવ સ્મસ્તેષામેવમિતિ ॥

સ હોવાચ । યદિદમિચ્છાચિદિચ્છાચિદીક્ષધ્વૈ કિં તદ્યેન
બ્રાહ્મણ ઇતિ । તે હોચુર્યદિદમૃગ્યજુષૈરેવોપવત્વન્નો
જુહુવુર્યદ્વૈનમુપાઘ્રાસિષુર્યદુપાનેષતૈતદ્બ્રાહ્મણા ઇતિ । સ
હાવિદૂર એવ શવશયિતમાત્રેયમચ્છાવદમુપદર્શયન્નુવાચ ।
યદિદમૃગ્યજુષૈરુપવત્વં જુહોપાઘ્રાસીદથોપાનેષ્ટ નૈતદત્યગાદિતિ ।
કિં તદિતિ હોચુઃ ॥

સ હોવાચ । નૈમિષેઽમી શુનકાઃ સત્રમાસત । તેષામાત્રેયોઽચ્છાવદઃ
સર્વાણ્યેવાવર્તયદ્યદ્યાજ્યા યદનુવાક્યા યત્પ્રાતરનુવાકો
યત્પ્રઉગં યદાજ્યં યન્મરુત્વતીયમિત્યથ યન્મહાવીરસમ્ભરણાનિ
યદગ્નેરભિવર્તનાનિ યદ્રાજાભિક્રયણાનિ યદભિષાવિત્રાણિ યદૌપયામાનિ
યદુપમન્ત્રણાન્યથ યત્રિવૃત્પઞ્ચદશઃ સપ્તદશ એકવિંશ ઇતિ ।
ક્વાસ્ય તદગાદિતિ । તેહામુહન્ । અથૈતે સર્વ એવોપસમેત્યોચુરુપ નો
નયસ્વેમ એવ ત ઇતિ । સ હ સ્મયમાન ઉવાચ । સમ્પશ્યધ્વા એવ મા
પ્રમદત । ન હોત્તમાનધમ ઉપનેતેતિ । તે હોચુર્મૈવ સ્મોપનથા
ગતિસ્તુ ત્વમિદિતિ ॥

સ હોવાચ । કુરુક્ષેત્રં એવોપસમેત્ય યે બાલિશાસ્તાનુપાધ્વૈ । તે વ
ઇદં પ્રવક્ષ્યન્તીતિ । તે હ તત એવોપસમેત્ય કુરુક્ષેત્રમુપજગ્મુઃ ।
તે હ બાલિશાનેવોપાસદન્ । તાનિમ ઉપસીદત એવ વિદાઞ્ચક્રુરિતિ
કામુકા ઇતિ । તે હોચુર્યત્કિમિવ બાલિશાનુપાસદત મહાશાલા વૈ

મહાશ્રોત્રિયા વર્ષીયાંસઃ સન્તઃ યન્મહાશાલા મહાશ્રોત્રિયા વર્ષીયાંસઃ કુરુક્ષેત્રમધ્યાસત ઇતિ । તે હાન્યોન્યસ્યાભિસમીક્ષામાસુઃ । તે હાપશ્યન્ન હાસ્માન્મિથુચિદેવાસાવવોચદ્બાલિશાનેવ ચૈતાન્વિચક્ષતેતિ । તે હોચુર્નમસ્યાનતીવ વચો રેચયિષ્યથ યદન્તર્નોઽસાવિહ પ્રાહૈયાત્ । યથૈવ તુ સ્મોપસન્ના અથાનસૂયવો યથોપશ્રદ્ધિન ઇતિ ॥

તે હોચુઃ । કિં વા અસ્મત્પ્રતીચ્છથેતિ । તે હોચુઃ । નૈમિષેઽમી શુનકાઃ સત્રમાસત । તેષામાત્રેયોઽચ્છાવદઃ સર્વાણ્યેવાવર્તયત્ । યદ્યાજ્યા યદનુવાક્યા યત્પ્રાતરનુવાકો યત્પ્રઉગં યદાજ્યં યન્મરુત્વતીયમિત્યથ યન્મહાવીરસમ્ભરણાનિ યદગ્નેરભિવર્તનાનિ યદ્રાજાભિક્રયણાનિ યદભિષાવિત્રાણિ યદૌપયામાનિ યદુપમન્ત્રણાન્યથ યત્ત્રિવૃત્પઞ્ચદશઃ સપ્તદશ એકવિંશ ઇતિ । ક્વાસ્ય તદગાદ્યદયં શવશયિતમશયિષ્ટેતિ । તે હોચુર્નહાસંવત્સરવાસિનામનુબ્રૂયાદિતિ ખલુ નઃ પૂર્વેઽન્વશિષન્ । યત્સંવત્સરં વત્સ્યથાથ વેદિષ્યથેતિ । તે હ સંવત્સરમૂષુઃ ॥

તતો હ બાલિશા ઊચુરવાત્ત વા સંવત્સરમિમે બ્રાહ્મણાઃ । હન્તૈષામનુબ્રવામેતિ । તે હ ગૃહીત્વૈવૈનાન્ પથોઽભિસમીયુઃ । તે હ સઙ્ક્રીડત એવ કૂબરિણો રથકટ્યામવિન્દન્ । તે હોચુઃ સમ્પશ્યધ્વમિતિ । કિં હીતિ । કૂબરિણમેવ સૌમ્યા ઇતિ । તથેતિ । કથમિવેતિ । યથૈવોપસૃત્વરો વાર્ધિસ્તિર્યગુલ્લલન્તીભિરિવ વીચિભિઃ શફાભિરેવોપસ્કન્દન્નુત્પ્લવેદેવં હૈવૈષોભિસૃત્વરાણામેવ ધુર્યાણાં ચક્રમતામરીણામુત્પ્લવતીતિ । યથૈવાસૌ પ્રતિસૃત્વરેણ સમઃ સમેવ ક્રીડેદેવં હૈષ સઙ્ક્રીડતીતિ । યથૈવાસાવિતશ્ચેતોઽમુતશ્ચામુતશ્ચ સમ્પ્રદ્રવત ઇવોપશુપ્યત ઇવોપસ્કન્દમભિમૃદ્રાત્યભિપાતયેદેવં હૈષ ઇતશ્ચેતશ્ચામુતશ્ચ સમ્પ્રદ્રવત ઇવોપશુપ્યત ઇવોપસ્કન્દમભિમૃદ્રાત્યભિપાતયતિ । યથૈવાસૌ રાજાનં વા રાજપુરુષં વા નિલયનં પ્રાયેદેવં હૈવૈષ યન્તા નિલયનં પ્રાપયતીતિ । તે હોચુરપીદં સાધીય ઇતિ । સાધીય ઇતિ હોચુઃ । તે હ તસ્યૈવ પન્થાનમનુપ્રાતિષ્ઠન્નન્તં હ સાયાહન્યેવોપસમ્પાદયામાસુઃ ॥

તં યદાવસાયાશ્વાંસ્તક્ષાપોહ્યાપાગાદથ બાલિશા વ્યલિષ્ટ । અહીદૃશત્ । કથમિવેતિ । તે હોચુર્યથૈતં

કાષ્ઠભારમાનદ્ધમનુપશ્યામસ્તથૈવાવશો ભૂસ્થઃ
સ્પન્દતે । નેઙ્ગતે ન વિવર્તતે ન ચ વીત ઇતિ । તે હ
બાલિશા ઊચુર્યદયમીદૃગભૂત્ કિમસ્યાપાગાદિતિ । તક્ષૈવેતિ ।
તથૈવૈતત્ સૌમ્યા ઇતિ । આત્મા વા અસ્ય પ્રચોદયિતા કરણાન્યશ્વાઃ
શિરા નદ્ધ્યોઽસ્થીન્યુપગ્રહા અસૃગાઞ્જનં કર્મ પ્રતોદો વાક્યં
ક્વાણનં ત્વગુપાનહ ઇતિ । સ યથા પ્રચોદયિત્રાપોજ્ઝિતો નેઙ્ગેન્ન
રુરુવીતૈવં હૈષ પ્રાજ્ઞેનાત્મનાપોજ્ઝિતો ન બ્રૂતે ન ચૈત્યપિ ન
શ્વસત્યપિ પૂયત્યપિ શ્વાન ઉપધાવન્ત્યપિ કાકાઃ પતન્ત્યપિ ગૃધ્રા
આસ્કન્દન્નપિ શિવા જિઘત્સન્નિતિ । તે તત એવ દ્રાગિવ વ્યજ્ઞાસિષુઃ ।
તે હ પાદયોરેવાભિમર્શ્ય બાલિશાનૂચુઃ । ન હ વાવ નસ્તથૈન નિષ્કુર્મ
ઇમમેવેત્યઞ્જલિં કૃત્વોપાસ્થિષતેત્યાહ
ભગવાન્ છાગલેયસ્ત ઇમે શ્લોકાઃ-
યથૈતત્કૂબરસ્તક્ષ્ણાપોજ્ઝિતો નેઙ્ગતે મનાક્ ।
પરિત્યક્તોઽયમાત્મા નસ્તદ્વદ્દેહો વિરોચતે ॥ ૧॥

યદસ્ય પ્રધયશ્ચક્રા યુગમક્ષો વરત્રિકા ।
પ્રતોદશ્ચર્મકીલ..... ॥ ૨॥ એતાવાનેવોપલબ્ધઃ

(સામાન્યવેદાન્ત-ઉપનિષદઃ)

ઇતિ છાગલયોપનિષત્ સમાપ્તા ।

Proofread by Sunder Hattangadi,
Radim Navyan radimnavyan at gmail.com, Kasturi navya sahiti

*ChAgaleyopaniShat*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*